शाषिता १६ जोषित् १७ जोषा १८ जोषिता १९ धनिका २० महेलिका २१ महेला २२। इति शब्दरत्नावली ॥ शर्व्वरी २३ योषीत् २४ सिन्दूरतिलका २५ सुभ्रूः २६। इति जटाधरः॥

अस्या उत्पत्तिकारणं यथा,—

"मातृरक्तोत्तरा नारी।" अन्यच्च।

"विषमायां तिथौ क्षिप्रं कुर्य्याद्बीजन्तु कन्य-
काम् ॥"

इति सुखबोधः ॥

तस्याश्चतस्रो जातयः। यथा,—

"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा।
चतस्रो जातयो नार्य्या रतौ ज्ञेया विशेषतः ॥"

इति रसमञ्जरी ॥

( आसां लक्षणादिकं यदुक्तं रतिमञ्जर्य्याम्। ४—१३।

"भवति कमलनेत्रा नासिका क्षुद्ररन्ध्रा
अविरलकुचयुग्मा चारुकेशी केशाङ्गी।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥
भवति रतिरसज्ञा नातिखर्व्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी।
घनकठिनकुचाढ्या सुन्दरी बद्धशीला
सकलगुणसमेता चित्रिणी चित्रवक्त्रा ॥
दीर्घातिदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता।
रेखात्रयेण च विभूषितकण्ठदेशा
सम्भोगकेलिरसिका किल शङ्खिनी सा ॥
स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला।
कामोत्सुका गाढ़रतिप्रिया या
नितान्तभोक्त्री करिणी मता सा॥
शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥
पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी।
शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी ॥
बाला च तरुणी प्रौढ़ा वृद्धा भवति नायिका।
गुणयोगेन रन्तव्या नारी वश्या भवेत्तदा ॥
आ षोड़शाद् भवेद्बाला तरुणी त्रिंशका मता।
पञ्चपञ्चाशका प्रौढ़ा भवेद्वृद्धा ततः परम् ॥
फलमूलादिभिर्बाला तरुणी रतियोगतः।
प्रेमदानादिभिः प्रौढ़ा वृद्धा च दृढ़ताड़नात् ॥
बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥" )

सा त्रिविधा यथा,—

"योषितस्त्रिविधा ब्रह्मन्! गृहिणां मूढ़चेतसाम्।
साध्वी भोग्या च कुलटा ताः सर्व्वाः स्वार्थतत्-
पराः।
परलोकभयात् साध्वी तथेह यशसात्मनः।
कामस्नेहाच्च कुरुते भर्त्तुः सेवाञ्च सन्ततम् ॥१॥
भोग्यां भोग्यार्थिनी शश्वत् कामस्नेहेऽथ केव-
लम्।
कुरुते पतिसेवाञ्च न च भोग्या दृढ़ेषणम् ॥
वस्त्रालङ्कारसम्भोगं सुस्निग्धाहारमुत्तमम्।
यावत् प्राप्नोति सा भोग्या तावच्च वशगा
प्रिया ॥२॥
कुलाङ्गारसमा नारी कुलटा कुलकामिनी।
कपटात् कुरुते सेवां स्वामिनो न च भक्तितः ॥
सदा पुंयोगमाशंसुर्मनसा मदनातुरा।
आहारादधिकं जारं प्रार्थयन्ती नवं नवम् ॥
जारार्थं स्वपतिं तात! हन्तुमिच्छति पुंश्चली।
तस्यां यो विश्वसेन्मूढ़ो जीवनन्तस्य निष्फलम् ॥
कथिता योषितः सर्व्वा उत्तमाधममध्यमाः।
स्वात्मारामा विजानन्ति मनसा तां न
पण्डिताः ॥" ३ ॥

तस्याः स्वभावो यथा,—

"हृदयं क्षुरधाराभं शरत्पद्मोत्सवं मुखम्।
सुधोपमं सुमधुरं वचनं स्वार्थसिद्धये ॥
प्रकोपे विषतुल्यं तदनूहं शीलकुत्सितम्।
दुर्ज्ञेयं तदभिप्रायं निगूढ़ं कर्म्म केवलम् ॥
तदा तासामविनयं प्रबलं साहसं परम्।
दृष्टौ कार्य्यच्छलात् कार्य्यं शश्वन्माया दूरत्यया ॥
पुंसश्चाष्टगुणः कामः शश्वत्कामो जगद्गुरो!।
आहारो द्विगुणो नित्यं नैष्ठुर्य्यञ्च चतुर्गुणम्।
कोपः पुंसः षड़्गुणश्च व्यवसायश्च निश्चितम् ॥
यत्रेमे दोषनिवहाः कास्था तत्र पितामह!।
का क्रीड़ा किं सुखं पुंसो विण्मूत्राश्रयवेश्मनि॥
तेजः प्रनष्टं सम्भोगे दिवालापे यशःक्षयः।
धनक्षयस्त्वतिप्रीतौ रत्यासक्तौ वपुःक्षयः ॥
साहित्ये पौरुषं नष्टं कलहे माननाशनम्।
सर्व्वनाशश्च विश्वासे ब्रह्मन्नारीषु किं सुखम् ॥
यावद्धनी च तेजस्वी सश्रीको योग्यतापरः।
पुमान्नारीं वशीकर्त्तुं समर्थस्तावदेव हि ॥
रोगिणं निर्गुणं वृद्धं योषिन्नापेक्षते प्रियम्।
लोकाचारतया तस्मै ददात्याहारमल्पकम् ॥"

इति ब्रह्मवैवर्त्तपुराणे ब्रह्मखण्डे २३ अध्यायः ॥

( नारीचरित्रदूषणकारणानि यथा, हितोप-
देशे। १। १३१—१३२।

"स्वातन्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गतिः
गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा।
संसर्गः सह पुंश्चलीभिरसकृत् वृत्तेर्निजायाः
क्षतिः
पत्युर्वार्द्धकमीर्षितं प्रवसनं नाशस्य हेतुः
स्त्रियाः ॥"

अपरञ्च,—

"पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥"

इयन्तु यथानियमं प्रतिपालिता कल्याणकरी श्रीवृद्धिकारिणी च। यदुक्तं मनौ।३।५५—६०।

"पितृभिर्भ्रातृभिश्चैताः पतिभिर्द्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः॥
यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफलाः क्रियाः ॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम्।
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा ॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च।
सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥")

अगम्या नार्य्यो यथा,—

"माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी तथा ॥
भागिनेयी तथा चैव राजपत्नी तथैव च।
तथा प्रव्रजिता नारी वर्णोत्कृष्टा तथैव च ॥
इत्यगम्यास्तु निर्द्दिष्टास्तासान्तु गमने नरः।
शिश्नस्योत्कर्त्तनं कृत्वा ततस्तु वधमर्हति ॥"

इति मत्स्यपुराणे २०१ अध्यायः ॥

तस्याः शुभलक्षणं यथा,—

"निगूढ़गुल्फौ पतितौ पद्मकान्तितलौ शुभौ।
अस्वेदिनौ मृदुतलौ मत्स्याङ्कमकरान्वितौ ॥
वज्राब्जहलचिह्नौ च दास्याः पादौ ततोऽन्यथा।
जङ्घे च रोमरहिते सुवृत्ते विशिरे शुभे ॥
अनुल्बणं सन्धिदेशं समं जानुद्वयं शुभम्।
ऊरू करिकराकारावरोमौ च समौ शुभौ ॥
अश्वत्थपत्रसदृशं विपुलं गुह्यमुत्तमम्।
श्रोणीललाटकं स्त्रीणामुरु कूर्म्मोन्नतं शुभम् ॥
गूढ़ो मणिश्च शुभदो नितम्बश्च गुरुः शुभः।
विस्तीर्णमांसोपचिता गम्भीरा विपुला शुभा ॥
नाभिः प्रदक्षिणावर्त्ता मध्यं त्रिवलिशोभनम्।
अरोमशौ स्तनौ पीनौ घनावविषमौ शुभौ ॥
कठिनावरोम उरो मृदुग्रीवा च कम्बुता।
आरक्तावधरौ श्रेष्ठौ मांसलं वर्त्तुलं मुखम् ॥
कुन्दपुष्पसमा दन्ता भाषितं कोकिलासमम्।
दाक्षिण्ययुक्तमशठं हंसशब्दसुखावहम् ॥
नासा समा समपुटा स्त्रीणान्तु रुचिरा शुभा।
नीलोत्पलनिभं चक्षुर्नासंलग्नौ न लम्बकौ ॥
न पृथू बालेन्दुनिभे भ्रुवौ चाथ ललाटकम्।
शुभमर्द्धेन्दुसंस्थानमतुङ्गं स्यादलोमशम् ॥
अमांसलं कर्णयुगं समं मृदु समाहितम्।
स्निग्धा नीलाश्च मृदवो मूर्द्धजाः कुञ्चितैकजाः॥
स्त्रीणां समं शिरः श्रेष्ठं पादे पाणितले तथा।
वाजिकुञ्जरश्रीवृक्षयूपेषु यवतोमरैः ॥
ध्वजचामरमालाभिः शैलकुण्डलवेदिभिः।
शङ्खातपत्रपद्मैश्च मत्स्यस्वस्तिकसद्रथैः।
लक्षणैरङ्कुशाद्यैश्च स्त्रियः स्यू राजवल्लभाः ॥
निगूढ़मणिबन्धौ च पद्मगर्भोपमौ करौ।
न निम्नं नोन्नतं स्त्रीणां भवेत् करतलं शुभम् ॥
रेखान्विताऽल्पविधवां कुर्य्यात् सम्भोगिनीं स्त्रियम्।
रेखा या मणिबन्धोत्था गता मध्याङ्गुलीं करे ॥
गता पाणितले या च योर्द्धा पादतले स्थिता।
स्त्रीणां पुंवां तथा सा स्याद्राज्याय च सुखाय
च ॥
कनिष्ठिका मूलरेखा कुर्य्याच्चेत् शतायुषम्।
प्रदेशिनीमध्यमाभ्यामन्तरालगता सती ॥
ऊना ऊनायुषं कुर्य्याद्रेखा चाङ्गुष्ठमूलगा।